# .. Pind Upanishad ..

## ॥ પિણ્ડોપનિષત્ ॥

### Document Information

Text title : Pinda Upanishad
File name : piNDopaniShat.itx
Category : upaniShat
Location : doc_upanishhat
Author :
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Sunder Hattangadi sunderh at hotmail.com
Proofread by : Sunder Hattangadi sunderh at hotmail.com
Translated by :
Description/comments : Atharva Veda upanishad
Source :
Acknowledge-Permission:
Latest update : March 21, 2015
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ પિણ્ડોપનિષત્ ॥

પિતૄણાં હંસરૂપાણાં યન્તા શ્રીમજ્જનાર્દન ।
ભવતાપપ્રણુત્યર્થં સતતં તમહં શ્રયે ॥ ૧॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ ॥
દેવતા ઋષયઃ સર્વે બ્રહ્માણમિદમબ્રુવન્ ।
મૃતસ્ય દીયતે પિણ્ડઃ કથં ગૃહ્ણન્ત્યચેતસઃ ॥ ૧॥
ભિન્ને પઞ્ચાત્મકે દેહે ગતે પઞ્ચસુ પઞ્ચધા ।
હંસસ્ત્યક્ત્વા ગતો દેહં કસ્મિઁસ્થાને વ્યવસ્થિતઃ ॥ ૨॥
અહં વસતિ તોયેષુ અહં વસતિ ચાગ્નિષુ ।
અહમાકાશગો ભૂત્વા દિનમેકં તુ વાયુગઃ ॥ ૩ ॥
પ્રથમેન તુ પિણ્ડેન કલનં તસ્ય સમ્ભવઃ ।
દ્વિતીયેન તુ પિણ્ડેન માંસત્વક્શોણિતોદ્ભવઃ ॥ ૪॥
તૃતીયેન તુ પિણ્ડેન મતિસ્તસ્યાભિજાયતે ।
ચતુર્થેન તુ પિણ્ડેન અસ્થિ મજ્જા પ્રજાયતે ॥ ૫॥
પઞ્ચમેન તુ પિણ્ડેન હસ્તાઙ્ગુલ્યઃ શિરો મુખમ્ ।
ષષ્ઠેન કૃતપિણ્ડેન હૃત્કણ્ઠં તાલુ જાયતે ॥ ૬॥
સપ્તમેન તુ પિણ્ડેન દીર્ઘમાયુઃ પ્રજાયતે ।
અષ્ટમેન તુ પિણ્ડેન વાચં પુષ્યતિ વીર્યવાન્ ॥ ૭॥
નવમેન તુ પિણ્ડેન સર્વેન્દ્રિયસમાહૃતિઃ ।
દશમેન તુ પિણ્ડેન ભાવાનાં પ્લવનં તથા ।
પિણ્ડે પિણ્ડશરીરસ્ય પિણ્ડદાનેન સમ્ભવઃ ॥ ૮॥
હરિઃ ૐ તત્સદિત્યુપનિષત્ ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇત્યાથર્વણીયા પિણ્ડોપનિષત્સમાપ્તા ॥

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com

.. Pind Upanishad ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*